इति किम् ? आगच्छ देवदत्त ग्रामम्, पिता ते ओदनं भोक्ष्यते। उह्यन्तां देवदत्तेन शालयः, सक्तवः तेन पास्यन्ते। सर्वग्रहणं किम् ? आगच्छ देवदत्त ग्रामम्, त्वं चाहं च द्रक्ष्यावः एनम् इत्यत्रापि निघातप्रतिषेधो यथा स्यात्। लृडन्तवाच्ये हि सर्वस्मिन् कारके अन्यस्मिन् न भवितव्यम्, इह तु यत् लोडन्तस्य कारकं तच्चान्यच्च [1]लृडन्तेन उच्यते इति ॥

## लोट् च। (८२/३९७९)

लोडन्तं तिङन्तं गत्यर्थलोटा युक्तं नानुदात्तं भवति, न चेत् कारकं सर्वान्यद् भवति। लोडन्तयोरेकं [2]कारकं यदि भवति इत्यर्थः। आगच्छ देवदत्त, ग्रामं पश्य[3]। आगच्छ [4]विष्णुमित्र, ग्रामं शाधि। आगम्यतां देवदत्तेन, ग्रामो दृश्यतां यज्ञदत्तेन। [5]गत्यर्थानाम् इत्येव, पच देवदत्तौदनम्, भुङ्क्ष्व एनम्। [6]लोटा इत्येव, आगच्छेः देवदत्त ग्रामम्, पश्य एनम्। न चेत् कारकं सर्वान्यत् इत्येव, आगच्छ देवदत्त ग्रामम्, पश्यतु एनम् यज्ञदत्तः। सर्वग्रहणानुवृत्तेस्तु इह भवत्येव, आगच्छ देवदत्त ग्रामम्, त्वं चाहं च पश्याव[7]। पृथग्योगकरणमुत्तरार्थम् ॥

## विभाषितं सोपसर्गमनुत्तमम्। (८३/३९८०)

[8]पूर्वं सर्वमनुवर्तते। प्राप्तविभाषा इयम्। लोडन्तं सोपसर्गम् उत्तमवर्जितं गत्यर्थलोटा युक्तं तिङन्तं विभाषितं नानुदात्तम् भवति, न चेत् कारकं सर्वान्यद् भवति। आगच्छ देवदत्त, ग्रामं प्रविश, प्रविश। आगच्छ देवदत्त, ग्रामं प्रशाधि, [9]प्रशाधि। सोपसर्गम् इति किम् ? आगच्छ देवदत्त, ग्रामं पश्य। अनुत्तमम् इति किम् ? [10]आगच्छानि देवदत्त, ग्रामं प्रविशानि ॥

## हन्त च। (८४/३९८१)

[11]पूर्वं सर्वमनुवर्तते गत्यर्थलोटं वर्जयित्वा। हन्त इत्यनेन युक्तं लोडन्तं [12]सोपसर्गम् [13]उत्तमवर्जितं विभाषितं नानुदात्तम् भवति। हन्त प्रविश, [14]प्रविश। हन्त प्रशाधि, [15]प्रशाधि। सोपसर्गम् इत्येव, हन्त कुरु। निपातैर्यद्यदिहन्त (८. १. ३०/३९३७) इति नित्यमत्र निघातप्रतिषेधो भवति। अनुत्तमम् इत्येव, हन्त प्रभुनजावहै। हन्त प्रभुनजामहै ॥

## आम एकान्तरमामन्त्रितमनन्तिके। (८५/३९८२)

आमः उत्तरम् [16]एकपदान्तरम् आमन्त्रितान्तम् अनन्तिके नानुदात्तं भवति। आम् पचसि देवदत्त३। आम् भो देवदत्त३। भो इत्यामन्त्रितान्तमपि, नामन्त्रिते समानाधिकरणे सामान्यवचनम् इति नाविद्यमानवद् भवति। आमः इति किम् ? शाकं पचसि देवदत्त३। [17]एकान्तरम् इति किम् ? आम् प्रपचसि देवदत्त३। आमन्त्रितम् इति किम् ? आम् पचति देवदत्तः। [18]अनन्तिके इति किम् ? आम् [19]देवदत्त।

---

1. कारकम् इत्यधिकम् ह. 2. कारकं नास्ति क. 3 एनम् इत्यधिकम् ड. 4. देवदत्त ब. क. इ. ड, व्रज विष्णुमित्र न ग्रामं प्रशाधि ह. 5. गत्यर्थानाम् – एनम् यज्ञदत्तः नास्ति ब. क. 6. लोट् ड. 7. एनम् इत्यधिकम् ड. इ. 8. वाक्यमिदं नास्ति ब.क.इ. 9. प्रशाधि नास्ति ब.क. 10. आगच्छ ब. 11. वाक्यमिदं नास्ति ब.क.ड.इ.ह. 12. तिङन्त इत्यधिकम् क.ड.ह. 13. अनुत्तमम् क. 14–15. नास्ति क.इ. 16. एकपदान्तरितम् ब.क.इ. 17. एकोत्तरम् क. 18. अनन्त इति इ. 19. पचसि इत्यधिकम् ड.